E/EB

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : जून–जुलै – २०२२**

**सत्र ६ वे**

**विषयः कादम्बरी/कादम्बरी–कथामुख (19E462/EB4610)**

**दिनांक : २१/०६/२०२२ गुण : ८० वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. त्रयाणामनुवादं ससंदर्भं लिखत। (२४)**

१) अथ प्रतीहारी नरपतिकथनानन्तरमुत्थाय तां मातङ्गकुमारी प्रावेशयत्। प्रविश्य च सा नरपतिसहस्त्रमध्यवर्तिनमशनिभयपुञ्चिकुलशैलमध्यगतमिव कनकशिखरिणम् अनेक रत्नाभरणाकिरणजालकान्तारितावयवमिन्द्रायुधसहस्त्रसंछदिताष्टदिग्भागमिव जलधरदिवसम् उन्मयूखकान्तिविजयपराभवप्रणते शशिनीव स्फटिकपादपीठे विन्यस्तवामपादम्, अमलमणिकुट्टिमसंक्रान्तदेहप्रतिबिम्बतया पतिप्रेम्णा वसुन्धरया हृदयेनेवोयमानं राजानमद्राक्षीत्।

२) यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकराः, रतेषु केशग्रहाः, काव्येषु दृढबन्धाः शास्त्रेषु चिन्ता, स्वप्नेषु विप्रलम्भाः छत्रेषु कनकदण्डाः ध्यजेषु प्रकम्पाः गीतेषु रागविलसितानि, करिषु मदविकाराः, चापेषु गुणच्छेदाः गवाक्षेषु जालमार्गाः शशिकृपाणकवचेषु कलङ्काः रतिकलहेषु दूतप्रेषणानि सार्यक्षेषु जालमार्गाः शशिकृपाणकवचेषु कलङ्काः,रतिकलहेषु दूतप्रेषणानि सार्यक्षेषु शून्यगृहाः, न प्रजानामासन्। यस्य च परलोकाद्भयम्, अन्तःपुरिकाकुन्तलेषु भङ्गः,नूपुरेषु मुखरता, विवाहेषु करग्रहणम् अनवरतमखाग्निधूमेनाश्रुपातः, तुरङ्गेषु कशाभिघातः मकरध्वजे चापध्वनिरभूत।

३) सुभाषितं हारि विषत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतम्।
तदेव धत्ते हृदयेन सज्जनो हरिर्महारत्नमिवातिनिर्मलम्।।
बभूव वात्सायनवंशसंभवो द्विजो जगद्गीतगुणोऽग्रणीःसताम्।
अनेकगुप्तार्चितपादपङ्कजः कुबेरनामांश इव स्वयंभुवः।।
हिरण्यगर्भो भुवनाण्डकादिव क्षपाकरः क्षीरमहार्णवादिव।
अभूत्सुपर्णो विनतोदरादिव द्विजन्मनामर्थपतिः पतिस्ततः।।

४) प्रायेण हि पक्षिणः भयाहारनिद्रामैथुननिद्रासंज्ञामात्रवेदिनो भवन्ति। इदं तु महच्चित्रम् इत्युक्तवति भूभुजि कुमारपालितः किंचित् स्मितवदनोऽवादीत्– 'किमत्र चित्रम्। एते हि शुकसारिकाप्रभृतयो विहङ्गविशेषा यथाश्रुतां वाचमुच्चरयन्तीत्यधिगतमेव देवेन। तत्राप्यन्यजन्मोपात्तसंस्कारनुबन्धेन वा पुरूषप्रयत्नेन वा संस्कारातिशय उपजायत इति नातिचित्रम्'

**प्र.२. ससंदर्भं स्पष्टीकरणं कुरुत। (केवलं षट्) (३६)**

१) जहासेव वासुदेवम्।
२) विहङ्वेशधारी कश्चिपृच्छन्नं निवससि।
३) करतलोपनीयमानममृतायते।
४) आलेख्यगतामिव दर्शनमात्रफलाम्।
५) विहङ्गवेशधारी कश्चिच्छन्न निवससि।
६) क्रूरसत्त्वापि मुनिजनसेविता विन्धाटवी।
७) मेदनधूममलिनीकृता।
८) कुपतिमपि कलत्रवल्लभम्।

**प्र.३. टिप्पणीद्वयं लिखत। (२०)**

१) राज्ञः वैशम्पायनं प्रती कौतुहलम्।
२) विन्ध्याटवीवर्णनम्।
३) मातङ्गकन्या।
४) बाणभट्टस्य लेखनशैली।

----------